CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 5497

Title Kāśikā vritti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 547 Subject: Grammar.

Title: Kaśikā vritti

Author: Vāmana Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.3" by 4.2" Extent: 24 to 39 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

का॰अ॰१पा॰
२८

॥श्रीगणेशाय नमः॥ ॥ गाङ्कुटादिभ्योऽञ्णिन्ङित्। अतिदेशोऽयं। गाङिति इङादेशो गृह्यते। न गा
ङ् गताविति। ङकारस्यानन्यार्थत्वात्। कुटादयः कुट कौटिल्ये इत्यत आरभ्य यावत् कुङ् शब्दे इति॥
एतेभ्यो गाङ्कुटादिभ्यः परेऽञ्णितः प्रत्यया ङितो भवंति। गाङ्। अध्यगीष्ट। अध्यगीषातां। अध्यगी
षत। कुटादिभ्यः। उत्कुटिता। उत्कुटितुं। उत्कुटितव्यं। उत्पुटिता। उत्पुटितुं। उत्पुटितव्यं। अञ्णिदि
ति किं। उत्कोटयति। उत्कोटकः। उत्कोटो वर्त्तते। व्यचेः कुटादित्वमनसीति वक्तव्यं। उद्विचिता। उद्वि
चितुं। उद्विचितव्यं। अनसीति किं। उरुव्यचाः॥१॥ ॥विज इट्। ओविजी भयचलनयोः। अस्मात्पर इ
डादिः प्रत्ययो ङिद्भवति। उद्विजिता। उद्विजितुं। उद्विजितव्यं। इडिति किं। उद्वेजनीयं। उद्वेजनं॥२॥ ॥
विभाषोर्णोः। इडिति निवृत्तं। ऊर्णुञ् आच्छादने। अस्मात्पर इडादिः प्रत्ययो विभाषा ङिद्भवति। प्रोर्णुवि
ता। प्रोर्णविता। इडित्येव। प्रोर्णवनं। प्रोर्णवनीयं॥३॥ ॥सार्वधातुकमपित्। सार्वधातुकं यदपित् ३
तत् ङिद्भवति। कुरुतः। कुर्वंति। चिनुतः। चिन्वंति। सार्वधातुकमिति किं। कर्ता। कर्तुं। अपिदिति किम्

करोति। करोषि॥४॥ ॥असंयोगाल्लिट् कित्। अपिदित्येव। असंयोगांताद्धातोः परो लिट् प्रत्ययः अ
पित् किद्भवति। बिभिदतुः। बिभिदुः। चिच्छिदतुः। चिच्छिदुः। असंयोगादिति किं। सस्रंसे। दध्वंसे। अपिदि
त्येव। बिभेद। चिच्छेदिथ॥५॥ ॥इंधिभवतिभ्यां च॥ इंधिभवतिभ्यां परो लिट् प्रत्ययः किद्भवति
समीधे दस्युहंतमं॥ पुत्र ईधे अथर्वणः। बभूव। बभूविथ। इंधेः संयोगार्थं वचनं। भवतेः पि
दर्थं वचनं। श्रन्थेरिष्टिः। श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यं। श्रेथतुः। ग्रेथतुः। देभतुः। श्रेथुः। ग्रेथुः। देभुः। प
रिषस्वजे। परिषस्वजाते ह॥६॥ ॥मृडमृदगुधकुषक्लिशवदवसः क्त्वा। मृड। मृद। गुध। कुष। क्लिश। वद
वस। इत्येतेभ्यः क्त्वाप्रत्ययः किद्भवति। न क्त्वा सेडिति प्रतिषेधं वक्ष्यति। तस्यायं पुरस्तादपकर्षः। गुधकुश
क्लिशीनां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनं। मृडित्वा। मृदित्वा। गुदित्वा। गुधित्वा। कुशित्वा।
क्लिषित्वा। उदित्वा। उषित्वा॥७॥ ॥रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। रुदविदमुषग्रहिस्वपिप्रच्छ इत्ये
तेभ्यः संश्च क्त्वा च कितौ भवतः। रुदविदमुषीणां रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनं।

ग्रहेर्विध्यर्थमिदं। अपिंप्रश्लोऽनर्थयहणं। किरेव हिक्का। रुदित्वा। रुरुदिषति। विदित्वा। विविदिषति।
मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। सुप्त्वा। सुषुप्सति। पृष्ट्वा। पिपृच्छिषति। ग्रहादीनां कित्वा
त्संप्रसारणं भवति। किरश्च पंचभ्यः इति प्रश्लेषेरिडागमः। इको झल्। सनित्यनुवर्तते। क्ङिति निवृत्तं। इ
गंताद्धातोः परो झलादिः सन् किद्भवति। अज्झनगमां सनि इति दीर्घत्वं गुणस्य बाधकं न विप्यति यद्येवं
तर्हि गुणं बाधते। तथा णिलोपमपि बाधेत। तस्माद्दीर्घस्यावकाशदानाय कित्वमिदमारभ्यते चिची
षतीत्यादौ सावकाशं दीर्घत्वं परत्वात् णिलोपेन बाध्यते। ज्ञाप्सनिर्झकः कित्वं गुणो मा भूत दीर्घारंभा
त्कृते भवेत्। अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते। सामर्थ्याद्धि पुनर्भाव्यम् ऋदित्वं दीर्घसंश्रयं।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनं। ॥९॥ ॥हलंताच्च॥ इकः सन् झल् इति वर्तते। समीपव
चनोऽन्तशब्दः। हलंतात् सावंतश्च हलंतः। इगंतात् इक् समीपागतात् हलः परः सन् झलादिः किद्भवति॥ २
विभित्सति। बुभुत्सते। इकः इत्येव। विवहते। हलित्येव विवर्द्धिषते। दंभेर्हल्ग्रहणस्य जातिवाचित्वा

त्सिद्धं। धिप्सति ॥१०॥ ॥लिङ्सिचावात्मनेपदेषु॥ हलंतादिको झल् किदिति वर्तते। सनिति निवृत्तं। इगंतादिक
समीपाद्धलः परौ झलादी लिङ्सिचौ आत्मनेपदेषु परतः कितौ भवतः। भित्सीष्ट। भुत्सीष्ट। सिचः खल्वपि। अ
भित्त। अबुद्ध। इकः इत्येव। यक्षीष्ट। अयष्ट। संप्रसारणं हि स्यात्। आत्मनेपदेष्विति किं। अस्राक्षीत्। अद्रा
क्षीत्। सृजिदृशोर्झल्यमकिति। इत्यमागमो न स्यात्। हलंतादित्येव। चेषीष्ट। अचेष्ट। गुणो न स्यात्॥
झलित्येव। वर्त्तिषीष्ट। अवर्त्तिष्ट। गुणो न स्यात् ॥११॥ ॥उश्च॥ ऋवर्णांताद्धातोः परौ लिङ्सिचौ आ
त्मनेपदेषु झलादी कितौ भवतः। कृषीष्ट। सिचः खल्वपि। अकृत। अहृत। झलित्येव। वरिषीष्ट। अवरी
ष्ट। आत्मनेपदेष्विति किं। अकार्षीत्। अहार्षीत्। वा गमः॥१२ लिङ्सिचावात्मनेपदेष्विति वर्तते। गमेर्धातोः
परौ लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः। संगसीष्ट। संगंसीष्ट। समगत। समगंस्त। कित्वपक्षे
अनुनासिकलोपो भवति। अनुदात्तोपदेशवनतितनोत्यादीनामिति ॥१३॥ ॥हनः सिच्॥ हंतेर्धातोः परः सि
च् किद्भवति। आहत। आहसातां। आहसत। सिचः कित्वात्। अनुनासिकलोपः। सिच्ग्रहणं लिङ्निवृत्त्यर्थं।

का॰ आ॰ पा॰ २

२६

उत्तरत्रानुवृत्तिर्माभूत्। आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्तते। इह तु परस्मैपदेषु हनेर्वधभावस्यानित्यत्वा
त्किंचिदस्य प्रयोजनं नास्ति॥२४॥ ॥यमो गंधने सिच् आत्मनेपदे॥ इति वर्त्तते। यमेर्धातोर्गंधने वर्त्तमाना
त्परः सिच्प्रत्ययः किद्भवति आत्मनेपदेषु परतः। गंधनं सूचनं। परेण प्रच्छाद्यमानस्यावद्यस्याविःकरण
मनेकार्थत्वाद्धातूनां यमिः सूचने वर्त्तते। उदायत। उदायसातां। उदायसत। सूचितवानित्यर्थः। सिचः
किद्वादनुनासिकलोपः। आङो यमहन इत्यात्मनेपदं। गंधन इति किं। उदायंस्त पादं। उदायंस्त कूपात्
रज्जुं उद्धृतवानित्यर्थः। सकर्मकत्वे समुदाङ्भ्यो यमोऽग्रंथे इत्यात्मनेपदं॥२५॥ ॥विभाषोपयमने॥ यमः सिजा
त्मनेपदेष्विति वर्त्तते। यमेर्धातोरुपयमने वर्त्तमानात्परः सिच्प्रत्ययो विभाषया किद्भवति। आत्मनेपदेषु
परतः। उपायत कन्यां। उपायंस्त कन्यां। उपायत भार्यां। उपायंस्त भार्यां। उपयमनं स्वीकारः विवाहः।
दारकर्म पाणिग्रहणमित्यर्थः। उपाद्यमः स्वकरणे इत्यात्मनेपदं॥२६॥ ॥स्थाघ्वोरिच्च॥ सिजात्मनेपदेष्वि ३
ति वर्त्तते। तिष्ठतेर्धातोर्घुसंज्ञानां च इकारश्चांतादेशः सिच् किद्भवति। आत्मनेपदेषु परतः। उपास्थित।

करण॥४२

उपास्थिषातां। उपास्थिषत। घुसंज्ञकानां। अदित। अधित। इचकस्य त[illegible]त्वं दीर्घो माभूदिते।
पिसः अनंतरेऽकृतो माभूत्। कृतश्च विषये स्मृतः॥२७॥ ॥न क्त्वा सेट्॥ क्त्वाप्रत्ययः सेट् न किद्भवति। देवि
त्वा। सेवित्वा। वर्त्तित्वा। सेडिति किं। कृत्वा। हत्वा। क्त्वाग्रहणं किं। निगृहीतिः। उपास्निहितिः। निकु
चितिः। न सेडिति कृत्वे निष्ठायामवधारणात्तज्ज्ञापकान्न परोक्षायां सनि [illegible]लिङि इत्वाकि सं नियोगे
नरेण तु स्पंसुधावनी। वस्त्वर्थं किङ्गता देशानेनिगृहीतिः प्रयोजनं॥२८॥ ॥निष्ठाशीङ्स्विदिमिदि
क्ष्विदिधृषः॥ सेडिति न किद्भिवर्त्तते। शीङ्स्विदिमिदिक्ष्विदिधृष इत्येतेभ्यः परो निष्ठाप्रत्ययः से
ट्न किद्भवति। शयितः शयितवान्। प्रस्वेदितः प्रस्वेदितवान्। प्रमेदितः प्रमेदितवान्। प्रक्ष्वेदितः
प्रक्ष्वेदितवान्। धर्षितः धर्षितवान्। सेडित्येव स्विन्नः स्विन्नवान्। स्विदादीनामादित्त्वेनिनिष्ठाया
मिट् प्रतिषिध्यते। विभाषा भावादिकर्मणोरिति पक्षेऽपीट्। अन्यत्र ज्ञायते। स विषयः किल प्रतिषे
धस्य॥२९॥ ॥मृषस्तितिक्षायां॥ मृषेर्धातोस्तितिक्षायामर्थे निष्ठा सेट् न किद्भवति॥ तितिक्षा क्षमा।

का॰ अ॰१ पा॰२

२७

मर्षितः मर्षितवान्। तितिक्षायामिति किं। अपमर्षितं वाक्यमाह। ॥२०॥ उदुपधाद्भावादिकर्म्मणो
रन्यतरस्यां। निष्ठा सेट् न किदिति वर्त्तते उपधाद्धातोः परो भावे आदिकर्मणि वर्त्तमानो निष्ठाप्रत्ययः
सेडन्यतरस्यां न किद्भवति। द्योतितमनेन प्रद्योतितः प्रद्युतितः। [redacted]। मोदितमनेन प्रमुदितः।
प्रमोदितः। उदुपधादिति किं। लिखितमनेन। विदितमनेन। भावादिकर्म्मणोरिति किं। रुचितं का[illegible]णं।
सेडित्येव। प्रभुक्त ओदनः। व्यवस्थितविभाषा चेयं। तेन शब्विकरणनामेव भवति। गुधपरिवेष्टने। गु
धितमित्यत्र न भवति ॥२०॥२१॥ मृडः क्त्वा ॥ अन्यतरस्यामिति न स्वर्यते उत्तरत्र सूत्रे पुनर्वाक्य
नात्। न सेडिति वर्त्तते। मृडः श्वीडिदितः। क्लिशः क्त्वानिष्ठयोः। मृडश्वेति। मृडः परो निष्ठाप्रत्ययः सेट्
किन्न भवति। पवितः पवितवान्। न सेडिति वर्त्तते। क्त्वाप्रत्ययस्य न क्त्वा सेडिति सिद्ध एव प्रतिषेधः
तस्य ग्रहणमुत्तरार्थं। तथा चोक्तं निष्ठामकिन्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थमिति। ॥२२॥ नोपधात्थ ८
फान्ताद्वा। निष्ठेति निवृत्तं। नकारोपधाद्धातोः थकारान्तात् फकारान्ताच्च परः क्त्वा प्रत्ययः सेड्वा

न किद्भवति। ग्रथित्वा। ग्रंथित्वा। श्रथित्वा। श्रंथित्वा। गुफित्वा। गुंफित्वा। नोपधादिति किं। रेफित्वा।
शोफित्वा। गोफित्वा। थफान्तादिति किं। श्रंसित्वा। ध्वंसित्वा। ॥२३॥ वंचिलुंच्यृतश्च। वंचिलुंचि ऋत इत्ये
तेभ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। वचित्वा। वंचित्वा। लुचित्वा। लुंचित्वा। ऋतित्वा। अर्त्तित्वा।
ऋतेरीयङ् आर्द्धधातुके विकल्पितस्य यत्र पक्षे नास्ति तत्रेदमुदाहरणं। सेडित्येव ऋत्त्वा। ॥२४॥ ॥
तृषिमृषिकृशेः काश्यपस्य। न क्त्वा सेडिति प्रतिषेधे प्राप्ते किन्त्वं विकल्प्यते। तृषिमृषिकृशिभ्य एते
भ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति। काश्यपस्याचार्यस्य मतेन। तृषित्वा। तर्षित्वा। मृषित्वा। मर्षि
त्वा। कृषित्वा। कर्षित्वा। काश्यपग्रहणं पूजार्थं वेत्येव हि वर्त्तते। ॥२५॥ रलो व्युपधाद्धलादेः
संश्च। वेति वर्त्तते सेडिति च। उश्च इश्च वी। वी उपधे यस्य स व्युपधः। उकारोपधादिकारोपधाच्च धातो
रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा किती भवतः। क्रुतित्वा। द्योतित्वा। दिद्युतिषते। हलादेरिति किं।
एषित्वा। एषिषिषति। सेडित्येव। भुक्त्वा। बुभुक्षते। [illegible]॥२६॥ ऊकालोज्झ्रस्वदीर्घप्लुतः। ऊ इति त्रया

द्यः ।३०। समाहारः स्वरितः । अज्ञिति वर्त्तते । उदात्तानुदात्तस्वरसमाहारो योऽच् स स्वरितसंज्ञो भवति । साम
र्थ्याच्चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मौ उदात्तानुदात्तौ गृह्येते । नाचौ । समाहृतेन यस्मिन्न
वितस्य स्वरित इत्येषा संज्ञा विधीयते । शिक्यं । कन्या । सामान्यं । क्व स्वरितप्रदेशाः । नित्स्वरितमित्येवमा
द्यः ।३१। तस्यादित उदात्तमर्द्धह्रस्वं । उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं । तत्र न ज्ञायते । क
स्मिन्नंशेऽनुदात्तः कस्मिन्नुदात्तः कियानुदात्तः कियाननुदात्त इति । तदुभयमाख्यायते । आदावर्द्धह्रस्वं
उदात्तं परिशिष्टमनुदात्तं इति । अर्द्धह्रस्व इति चार्द्धमात्रह्रस्वो पलक्ष्यते । ह्रस्वग्रहणमतंत्रं । सर्वेषामे
व ह्रस्वदीर्घप्लुतानां स्वरितानामेष स्वरितविभागः । शिक्यमित्यत्रार्द्धमात्रादित उदात्तार्द्धमात्रानुदात्ता ।
एकश्रुतिर्वा । कन्या इत्यत्रार्द्धमात्रा आदित उदात्ता अध्यर्द्धमात्रानुदात्ता । माणवक३ माणवकेत्य
त्रार्द्धमात्रादित उदात्तार्द्धमात्रानुदात्ता । अर्द्धतृतीयमात्रानुदात्ता ।३२। एकश्रुति दूरात्संबुद्धौ ॥
त्रैस्वर्येण पठितानां मांत्राणां दूरात्संबुद्धौ एकश्रुतिर्विधीयते । एकाश्रुतिरित्येतदिदमेकश्रुति । एकश्रुति ६

वाक्यं भवति । दूरात्संबोधयति येन तत्संबोधनं संबुद्धिः नैकवचनं संबुद्धिः स्वराणामुदात्तादीनामवि
गोभेदतिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्ता३ दूरादिति किं । आगच्छ भो माणवक दे
वदत्त ।३३। यज्ञकर्मण्यजपन्यूङ्खसामसु । त्रैस्वर्येण वेदे मंत्राः पठ्यंते । तेषां यज्ञक्रियायामपि तथै
व प्रयोगे प्राप्ते एकश्रुतिर्विधीयते जपन्यूङ्खसामानि वर्जयित्वा । यज्ञकर्मणि मंत्राणामेकश्रुतं
भवति । अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां रेतांसि जिन्वतो३म् । यज्ञकर्मणीति किं । स्वपाठे
मा भूत् । अजपेष्विति किं । ममाग्ने वर्चो विहवेष्वस्तु जपोऽनुकरणमंत्र उपांशुप्रयोगः । अन्यूङ्खेष्विति
किं । न्यूङ्खा ओकाराः षट् । तेषु केचिदुदात्ताः केचिदनुदात्ताः । ओ३ ओ३ ओ३ ओ३ । असामस्विति किं । ए वि
श्वं समत्रिणं दह३ सामानि वाक्यविशेषस्था गीतयस्तूच्यंते । तत्रैकश्रुतिर्न भवति ।३४। उच्चैस्तरां
वा वषट्कारः । यज्ञकर्मणीति वर्त्तते । यज्ञकर्मणि च वषट्कारः उच्चैस्तरां वा भवति एकश्रुतिर्वा । वष
ट्शब्देनात्र वौषट्शब्दो लक्ष्यते । वौषडित्यस्यैवेदं स्वरविधानं । यद्येवं वौषड्ग्रहणमेव कस्मान्न भवति ।

विचित्राहिसूत्रस्य कृतिः पाणिनेः अस्य सोमस्याग्ने वीहि वौषट् ॥ विभाषाछंदसि ॥ छंदसि विषये विभा
षा एकश्रुतिर्भवति। पक्षांतरे त्रैस्वर्यमेव भवति। वेतिप्रकृते विभाषाग्रहणं यज्ञकर्मणीत्यस्य निवृ
त्त्यर्थं। तेनायं स्वाध्यायकालेपि पाक्षिक एकश्रुत्यविधिर्भवति। इषेत्वा। ऊर्जेत्वा। अग्न आयाहि वीतये।
अग्निमीळेपुरोहितं। अग्निमीळेपुरोहितं। शन्नोदेवीरभिष्टये। शन्नोदेवीरभिष्टये।३७। नसुब्र
ह्मण्यायांस्वरितस्यतूदात्तः॥ सुब्रह्मण्यानाम निगदः तत्र यज्ञकर्मणीति विभाषाछंदसीति च एकश्रु
तिः प्राप्ता प्रतिषिध्यते। सुब्रह्मण्यायामेकश्रुतिर्न भवति। यस्तु लक्षणप्राप्तः स्वरितः तस्योदा
त्तादेशो भवति। सुब्रह्मण्योम्। इंद्रागच्छ हरिव आगच्छ। मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्क
न्दिन् अहल्यायै जारः कौशिक ब्राह्मण गौतम ब्रुवाण श्वः सुत्यामागच्छ मघवन्। अत्र सुब्रह्मण्यो
मिति। ओंकारस्त्रिस्वरेण स्वरितः तस्योदात्तो विधीयते। इंद्र आगच्छेत्यामंत्रितमाद्युदात्तं। द्वितीयो व ७
र्णः अनुदात्तस्तस्योदात्तादनुदात्तस्य स्वरित इति स्वरितः प्रसक्तस्तस्यानेनोदात्तः क्रियते। द्वाव

उदात्तौ संपन्नौ। आगच्छेत्याकार उदात्तः ततः परोनुदात्तस्तस्योदात्तादनुदात्तस्य स्वरित इति स्वरितः
तस्यानेनोदात्तः क्रियते। तदेवमिंद्र आगच्छेति चत्वार उदात्ताः। पंचम एकोनुदात्तः। हरिव आगच्छेत्यन
येव प्रक्रियया चत्वार उदात्ताः। द्वावनुदात्तौ। मेधातिथेरिति षष्ठ्यंतं परमामंत्रितमनुप्रविशति सुबामं
त्रिते पराङ्गवत्स्वर इति। ततः सकलस्यास्य आमंत्रिताद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तं। तस्योदात्ता
दनुदात्तस्य स्वरित इति स्वरिते प्राप्तेऽनेनोदात्तत्वं विधीयते तेन द्वावुदात्तौ भवतः शेषमनुदात्तं।
वृषणश्वस्य मेन इति समानं पूर्वेण गौरावस्कंदिन्निति तथैव द्वे आद्ये अक्षरे उदात्ते शेषमनुदात्तं।
अहल्यायै जारेति सुबंतं स्यामंत्रितानुप्रवेशात् तद्वदेव स्वरः द्वावुदात्तौ। शेषमनुदात्तं। कौशिक ब्राह्म
णेत्याद्युदात्तं। तत्र सर्वत्र द्वावुदात्तौ। शेषमनुदात्तं। एवं गौतम ब्रुवाणेति द्वावुदात्तौ शेषमनुदात्तं। श्वः
सुत्यामागच्छ मघवन्निति श्वः शब्द उदात्तः सुत्यामित्यंतोदात्तः संज्ञायां समजनिषदेति क्यपो विधाने उदा
त्तरनिवृत्तेन आगच्छेति द्वावुदात्तौ। अंत्योनुदात्तः। मघवन्निति पदात्परमामंत्रितं निहन्यते।३८। देवब्रह्मणो

का॰ अ॰ १ पा॰ २

३२

रनुदात्तः। सुब्रह्मण्यामेव देवा ब्रह्माण इति पठ्यते। तत्र सर्वेण स्वरे स्वरितस्योदात्ते प्राप्ते अनेनानुदा
त्तो विधीयते। देव ब्रह्माणो स्वरितस्य अनुदात्त आदेशो भवति देवा ब्रह्माण आगच्छतागच्छत। द्व
योरपि पदयोरामंत्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः कृतः तस्यानुदात्तो भवति।३८
स्वरितात्संहितायामनुदात्तानां। एकश्रुतिरिति वर्तते। संहितायां विषये स्वरितात्परेषां अनुदात्ताना
मेकश्रुतिर्भवति। इमं मे गंगे यमुने सरस्वति शुतुद्रि। माणवक जटिलकाध्यापक क्व गमिष्यसि।।
इममित्यन्तोदात्तं। मे इत्यनुदात्तं। विधिकाल एव निघातविधानात्तस्मादुदात्तादनुदात्तस्य स्वरित
इति स्वरितं संपद्यते। तस्मात्स्वरितात्परेषामनुदात्तानां गंगे प्रभृतीनामेकश्रुतिर्भवति। सर्वेणैते आ
मंत्रितनिघातेनानुदात्ताः। माणवक जटिलकेति प्रथमामंत्रितं आद्युदात्तं तस्य द्वितीयमक्षरं स्वरितं
ततः परेषामनुदात्तानामेकश्रुतिर्भवति। संहितायामिति किं। अवग्रहे मा भूत्। अनुदात्ततरत्वं
देवा मरुतः। पृश्निमातरो यः। मातर इत्यनुदात्तः। अय इत्यन्तोदात्तः। उदित्पदाद्यपूर्वे घरमइति।८

२ इमं मे गंगे यमुने सरस्वति शुतुद्रि॥ ॥उदात्तस्वरितपरस्य सन्नतरः॥ ३८ ॥उदात्तः परो यस्मात् स उदात्तपरः स्वरितः परो यस्मात् स स्वरितपरः। उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति। ४२

तत्रानुदात्तोदात्तयोरेकादेशः उकारोनुदात्तः। तस्योदात्ते परभूते सन्नतर आदेशो भवति। इमं मे। गंगे। य
मुने। सरस्वति। शुतुद्रि। इकारोनुदात्तः। शुतुद्रि इत्येतदामंत्रितं पादादौ तस्मान्न निहन्यते। अनुदात्तं
सर्वमपादादाविति। तस्य प्रथममक्षरमुदात्तं। तस्मिन्परभूते सर्वस्य सरस्वती कारस्य सन्नतर आदेशो
भवति। माणवक जटिलकाध्यापक क्व गमिष्यसि क्व इति स्वरितस्तस्मिन्परभूते कशब्दस्यानुदात्तस्य स
न्नतर आदेशो भवति।४०॥ अपृक्त एकाल्प्रत्ययः। अपृक्त इत्ययं संज्ञा भवति। एकाल्यः प्रत्ययः
तस्य असहायवाची एकशब्दः। स्पृशोनुदके क्विन्। घृतस्पृक्। तैलस्पृक्। न जो गिविः। अर्द्धभाक्। पदभाक्
एकाल् इति किं। दर्विः। जागृविः। प्रत्यय इति किं। सुराः। अपृक्तप्रदेशाः वेरपृक्तस्येत्येवमादयः।४१। तत्पुरु
षः समानाधिकरणः कर्मधारयः। तत्पुरुष इति समासविशेषस्य संज्ञां वक्ष्यति। तत्पुरुषः समानाधि
करणपदः कर्मधारयसंज्ञो भवति। अधिकरणशब्दोऽभिधेयवाची। समानाधिकरणः समानाभि
धेयः परमराज्यं। उत्तमराज्यं। कर्मधारये राज्यमित्युत्तरपदाद्युदात्तत्वं न भवति। पाचकवृन्दारिका

३२

तत्पुरुष इति किं । पाचिकाभार्यः । समानाधिकरण इति किं । ब्राह्मणराज्यं । कर्म्मधारयप्रदेशाः क
र्मधारये निष्ठेत्येवमादयः ॥४२॥ प्रथमानिर्दिष्टं समास उपसर्जनं । प्रथमया विभक्त्या यन्निर्दिश्यते
समासशास्त्रे तदुपसर्जनसंज्ञं भवति । समास इति समासविधायिशास्त्रं गृह्यते । वक्ष्यते । द्वितीया
श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति द्वितीया समासे द्वितीयेत्येतत् प्रथमानिर्दिष्टं । तृतीयास
मासे तृतीयेति । चतुर्थी समासे चतुर्थीति । पंचमी समासे पंचमीति । षष्ठी समासे षष्ठीति । सप्तमी स
मासे सप्तमीति । कष्टश्रितः । शंकुलाखंडः । यूपदारु । वृकभयं । राजपुरुषः । अक्षशौंडः । उपसर्जनप्रदे
शाः । उपसर्जनं पूर्वं इत्येवमादयः ॥४३॥ एकविभक्ति चापूर्वनिपाते ॥ एका विभक्तिर्यस्य तदिदमेकवि
भक्ति । समासे विधीयमाने यन्नियतविभक्तिकं द्वितीयस्य संबंधिनि बहुभिर्विभक्तिभिर्युज्यमानेप्येक
यैव विभक्त्या युज्यते । तदुपसर्जनसंज्ञं भवति । अपूर्वनिपाते पूर्वनिपातलक्षणमुपसर्जनकार्यं व
र्जयित्वा । निरादयः क्रान्ताद्यर्थे पंचम्या । पूर्वपदे नानाविभक्तिकेप्युत्तरपदे पंचम्यन्तमेव भवति ॥ ८

निःक्रान्तः कौशांब्या निःकौशांबिः । निष्क्रान्तं कौशांब्याः निष्कौशांबिं । निःक्रान्तेन कौशांब्याः । निष्कौशांबि
ना । निःक्रान्ताय कौशांब्या निष्कौशांबये । निःक्रान्तात् कौशांब्याः निःकौशांबेः । निःक्रान्तस्य कौशांब्याः
निःकौशांबेः । निःक्रान्ते कौशांब्यां निःकौशांबौ । निर्वाराणसिः । एकविभक्तीति किं । राजकुमारी । अपू
र्वनिपात इति किं । न हि भवति । कौशांबिनिरिति ॥४४॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं । अभिधेयवच
नोर्थशब्दः । अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति । धातुप्रत्ययौ वर्जयित्वा । डित्थः । कपित्थः । कुंडं । पीठं ।
अर्थवदिति किं । धनं वनं । इति नांतस्य वधेर्मा भूत् । नलोपो हि स्यात् । अधातुरिति किं । हन्तेर्लङ् । अहन् ।
नलोपः स्यात् । अप्रत्यय इति किं । कांडे । कुड्ये । ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः स्यात् । अनर्थकस्य
निपातनस्य प्रातिपदिकसंज्ञा बाध्या । प्रातिपदिकप्रदेशाः ह्रस्वो नपुंसके प्रातिपदिकस्येत्येवमादयः ।
॥४५॥ कृत्तद्धितसमासाश्च ॥ कृतस्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवंति । अप्रत्यय इति पूर्वसूत्रे
पर्युदासात् । कृदंतस्य तद्धितांतस्य चानेन प्रातिपदिकसंज्ञा विधीयते । अर्थवत्समुदायानां समासग्र

३३ हणं नियमार्थं। कृतः कारकः। हारकः। कर्त्ता। हर्त्ता। तद्धितः। औपगवः। कापटवः। समासः। राजपुरुषः। ब्राह्मण
कंबलः। समासग्रहणस्य नियमार्थत्वाद्वाक्यस्यार्थवतः संज्ञा न भवति। ४७। ह्रस्वो नपुंसके प्रातिपदिकस्य।
नपुंसकलिंगेर्थे यत्प्रातिपदिकं वर्त्तते तस्य ह्रस्वो भवत्यादेशः। अलोंत्यस्य। अचः। अतिरि कुलं। अतिनु कुलं।
नपुंसक इति किं। ग्रामणीः सेनानीः। प्रातिपदिकस्येति किं। कुंडे तिष्ठंति। कुड्ये तिष्ठंति। प्रातिपदिकग्रहण
सामर्थ्यादिकादेशः। पूर्वांतवच्च भवति। ४८। गोस्त्रियोरुपसर्जनस्य। प्रातिपदिकस्येति वर्त्तते। गो इति स्वरू
पग्रहणं। स्त्री इति स्त्रीप्रत्ययग्रहणं। स्वरितत्वात्तदुपसर्जनग्रहणं। तयोर्विशेषणं गोरुपसर्जनस्य स्त्रीप्रत्य
यांतस्योपसर्जनस्येति। ताभ्यां प्रातिपदिकस्य तदंतविधिः। उपसर्जनगोशब्दस्यांतोपसर्जनस्त्रीप्रत्य
यांतस्य च प्रातिपदिकस्य ह्रस्वो भवति चित्रगुः। शबलगुः। स्त्रियाः निष्कौशांबिः। निर्वाराणसिः। अतिखट्वः।
अतिमालः। उपसर्जनस्येति किं। राजकुमारी। स्वरितत्वं किं। अतितंत्रीः। अतिश्रीः। अतिलक्ष्मीः। ईयसो १०
बहुव्रीहेः प्रतिषेधो वक्तव्यः। बहुश्रेयसी। विद्यमानश्रेयसी। ४९। लुक् तद्धितलुकि। स्त्रीग्रहणमनुवर्त्तते।

उपसर्जनस्येति च। पूर्वेण ह्रस्वत्वे प्राप्ते लुग्विधीयते। तद्धितलुकि सति स्त्रीप्रत्ययस्योपसर्जनस्य लुग्भवति
पंचेंद्राण्यो देवता अस्य पंचेंद्रः। दशेंद्रः। पंचभिः शष्कुलिभिः क्रीतः पंचशष्कुलः। आमलक्याः फलं। आमलकं।
कुवलं। बदरं। तद्धितग्रहणं किं। गार्ग्याः कुलं गार्गीकुलं। लुकीति किं। गार्गीत्वं। उपसर्जनस्येत्येव। अवंती
कुंती। कुरूः। ५०। इद्गोण्याः। पूर्वेण लुकि प्राप्ते इकारो विधीयते। गोण्यास्तद्धितलुकि सति इकारादेशो भ
वति। पंचभिर्गोणीभिः क्रीतः पटः पंचगोणिः। इदिति योगविभागः। पंचभिः सूचीभिः क्रीतः पंचसूचिः। द
शसूचिः। स च एव विषय एव। ५१। लुपि युक्तवद्व्यक्तिवचने। लुप् इति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते।
तत्र लुपि युक्तवद्व्यक्तिवचने भवतः। युक्तवदिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्यया
र्थमात्मना युनक्ति तस्य युक्तवतो व्यक्तिवचने ते लुबर्थे विधीयेते। अथवा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्ध
तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः। सप्तम्यर्थे वतिः। व्यक्तिवचने इति च लिंगसंख्ये। पूर्वाचार्यनिर्देशः।
तदीयमेवेदं सूत्रं। तथा चास्य प्रत्याख्यानं भविष्यति। तदशिष्यं संज्ञाप्रमाणत्वादिति। व्यक्तिः स्त्रीपुंनपुं

का॰ अ॰ १ पा॰ २

३५ सकानि। वचनमेकत्वद्वित्वबहुत्वानि। पंचालाः क्षत्रियाः। पुंल्लिंगं बहुवचनं विषयास्तेषां निवासो जनपद
यथा तेषु सत्स्विपे[?] व्यक्तिवचने तद्वज्जनपदेऽपि भवतः। पंचालाः कुरवः। मगधाः। मत्स्याः। अंगाः। वंगाः। सुह्माः। पुंड्राः।
लुपीति किं। लुकि मा भूत्। लवणः सूपः। लवणा यवागूः। लवणं शाकं। व्यक्तिवचन इति किं। शिरीषाणामदूर
भवो ग्रामः शिरीषाः। तस्य वनं शिरीषवनं। विभा॰ ... धिवनस्पतिभ्य इति णत्वं न भवति। हरितक्यादिषु
व्यक्तिः हरितक्याः फलानि हरितक्यः फलानि। खलतिकादिषु वचनं। खलतिकस्य पर्वतस्य अदूरभवा
नि वनानि। खलतिकं वनानि। ५२। विशेषणानां चाजातेः। लुपीति वर्त्तते। लुबर्थस्य यानि विशेषणानि
तेषामपि युक्तवद्व्यक्तिवचने भवतः। जातिं वर्ज[यित्वा]। पंचालाः रमणीयाः। बह्वन्नाः। बहुक्षीरघृताः। बहुमा
ल्यफलाः। गोदौ रमणीयौ। बह्वन्नौ। बहुक्षीरघृतौ। बहुमाल्यफलौ। अजातेरिति किं। पंचाला जनपदो
रमणीयः। गोदौ ग्रामः। तात्पर्यस्य चायं युक्तवद्भाव[प्रति]षेधः। तेन जातिद्वारेण यानि विशेषणानि तेषा ११
मपि युक्तवद्भावो न भवति। पंचाला जनपदः ... यो रमणीयो बह्वन्न इति। मनुष्यलुपि प्रति

षेधो वक्तव्यः। चंचाभिरूपः। वध्रिका दर्शनीयः। ५३। तदशिष्यं संज्ञाप्रमाणत्वात्। तदिति प्रकृतं युक्तवद्भावलक्षणं
निर्दिश्यते। तदशिष्यं न वक्तव्यं। कस्मात् संज्ञाप्रमाणत्वात्। संज्ञाशब्दा हि नानालिंगसंख्याः प्रमाणं पंचालाः
वरणा इति च। नैते योगशब्दाः। किं तर्हि जनपदादीनां संज्ञा एताः। तत्र लिंगवचनं स्वभावसिद्धमेव न पुनः प्रति
पाद्यं। यथा आपो दाराः गृहाः सिकता वर्षा इति। ५४। लुब्योगाप्रख्यानात्। लुबप्यशिष्यो योऽयं जनपदे लुप्
वरणादिभ्यश्चेति लुबुच्यते। अयं न वक्तव्यः। किं कारणं। योगाप्रख्यानात्। न हि पंचाला वरणा इति योगः
संबंधः प्रख्यायते। नैतदुपलभामहे। वृक्षयोगात् नगरे वरणा इति। किं तर्हि संज्ञा एताः। तस्मादतस्य
निवासः अदूरभवश्चेति तद्धितो नैवोत्पद्यते। किं लुपो विधानेन। ५५। योगप्रमाणे च तदभावेऽदर्शनं स्यात्
पंचालादयः संज्ञाशब्दा न योगनिमित्ता इत्युक्तं। तदावश्यमेवाभ्युपगंतव्यं। योगप्रमाणे हि तदभावेऽदर्शनं
स्यात्। यदि पंचालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात्। ततस्तदभावेऽदर्शनमप्रयोगः स्यात्
दृश्यते च संप्रति विनैव क्षत्रियसंबंधेन जनपदेषु पंचालादिशब्दः। ततो ज्ञायते। नायं योगनिमित्तकः।

किंतर्हि रूढिरूपेणैव तत्रभवतः इति ॥५५॥ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । अशिष्यमिति वर्त्तते ।
प्रधानं समासे किंचित्पदं प्रत्ययस्तद्धितादिः ताभ्यामर्थवचनमर्थाभिधानं । अनेन प्रकारेण भवतीति । पू
र्वाचार्यैः परिभाषितं । प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति । सह ब्रूतः । तत्पा
णिनिराचार्यः प्रत्याचष्टे । अशिष्यमेतदर्थस्यान्यप्रमाणत्वादिति । अन्यद्धि शास्त्रापेक्षया लोको
व्यपदिश्यते । शब्दैरर्थाभिधानं स्वाभाविकं । न परिभाषितव्यमशक्यत्वात् । लोकत एवार्थगतिः । यैरपि व्या
करणं न श्रुतं तेपि राजपुरुषमानयेत्युक्ते राजविशिष्टं पुरुषमानयंति । न राजानं नापि पुरुषमात्रं ।
औपगवमानयेत्युक्ते उपगुविशिष्टमपत्यमानयंति । नोपगुं नापत्यमात्रं । यश्च लोकतोर्थः सिद्धः किं त
त्र यत्नेन ॥५६॥ कालोपसर्जने च तुल्यं । अशिष्यमिति वर्त्तते । कालोपसर्जने चाशिष्ये । कस्मादर्थस्यान्य
प्रमाणत्वात् तुल्यशब्दो हेत्वनुकर्षणार्थः । अशिष्यविशेषणं चैतत् । इहान्ये वैयाकरणाः कालोपस १२
र्जने परिभाषां कुर्वंति । आन्याय्यादुत्थानादान्याय्याच्च संवेशनादेषोऽद्यतनः काल इति । अपरेत्वाहुः ।

अहरुभयतोर्धरात्रमेषोऽद्यतनः काल इति । तथोपसर्जनपरिभाषां कुर्वंति । अप्रधानमुपसर्जनमिति ।
तत्पाणिनिराचार्यः प्रत्याचष्टे । लोकतोर्थावगतेः । यैरपि व्याकरणं न श्रुतं । तेप्याहुरस्माभिरद्य कर्त्त
व्यं । श्वः कर्त्तव्यमिदं ह्यस्तनं कृतं कर्त्तव्यमिति । नैवं कृत्साध्यते । तथोपसर्जनं । वयं तस्यामेवोपसर्जनं
अप्रधानमिति गम्यते । यश्च लोकतोर्थः सिद्धः किं तत्र प्रयत्नेन । यद्येवं पूर्वसूत्र एव कालोपसर्जनग्रह
णं कस्मान्न क्रियते । किमर्थो योगविभागः प्रदर्शनार्थः । अन्यदप्येवंजातीयकमशिष्यमिति । तथाचे
पूर्वाचार्याः परिभाषंते । मत्वर्थे बहुव्रीहिः । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः
अन्यपदार्थप्रधानो बहुव्रीहिरित्येवमादि तदशिष्यमिति ॥५७॥ जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां
जातिर्नामापमेकोर्थः । तदभिधानएकवचनमेव प्राप्तं । अतइदमुच्यते । जातेराख्या जात्याख्या । जात्याख्या
यामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति । जात्यर्थे बहुवद्भवतीति यावत् । तेन तद्विशेषणानां
अजातिशब्दानामपि । संपन्नादीनां बहुवचनमुपपद्यते । संपन्नो यवः । संपन्ना यवा इति । संपन्नो

का॰ अ॰१ पा॰२
३६

व्रीहिः। संपन्ना व्रीहयः। सर्ववया ब्राह्मणः। प्रत्युत्थेयः। सर्ववयसो ब्राह्मणाः। प्रत्युत्थेयाः। जातिग्रहणं
किं। देवदत्तो यज्ञदत्तः। आख्यायामिति किं। काश्यपप्रतिकृतिः काश्यपः। न चाप्ययं जातिशब्दो न त्वनेन
जातिराख्यायते। किं तर्हि प्रतिकृतिः। एकस्मिन्निति किं। व्रीहियवौ। संख्याप्रयोगे प्रतिषेधो वक्तव्यः।
एको व्रीहिः संपन्नः सुभिक्षं करोति। ५८। अस्मदो द्वयोश्च। अस्मद एकत्वे द्वित्वे च बहुवचनमन्यतरस्यां
भवति। अहं ब्रवीमि। वयं ब्रूमः। आवां ब्रूमः। सविशेषणस्य प्रतिषेधो वक्तव्यः। अहं देवदत्तो ब्रवीमि।
अहं पटुर्ब्रवीमि। अहं गार्ग्यो ब्रवीमि। युष्मदि गुरावेकेषां त्वं मे गुरुः। यूयं मे गुरवः। ५९। फल्गुनीप्रोष्ठ
पदानां च नक्षत्रे। चकारो द्वयोरित्यनुकर्षणार्थः। फल्गुन्योर्द्वयोः। प्रोष्ठपदयोश्च बहुवचनमन्यतरस्यां भ
वति। कदा पूर्वे फल्गुन्यौ। कदा पूर्वाः फल्गुन्यः। कदा पूर्वे प्रोष्ठपदे। कदा पूर्वाः प्रोष्ठपदाः। नक्षत्र इति किं।
फल्गुन्यौ माणविके। ६०। छंदसि पुनर्वस्वोरेकवचनं। अन्यतरस्यामित्यनुवर्तते। द्वयोर्द्विवचने प्राप्ते। २३
पुनर्वस्वोः छंदसि विषय एकवचनमन्यतरस्यां भवति। पुनर्वसु नक्षत्रमदितिर्देवता। पुनर्वसू नक्षत्र

अदितिर्देवता २

कौ२

नक्षत्र इत्येव। पुनर्वसू माणवकौ। ६१। विशाखयोश्च। छंदसीत्यनुवर्तते। द्विवचने प्राप्ते छंदसि विषये विशा
खयोरेकवचनमन्यतरस्यां भवति। विशाखा नक्षत्रमिंद्राग्नी देवता। विशाखे नक्षत्रमिंद्राग्नी देवता।
६२। तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं। तिष्य एकः पुनर्वसू द्वौ। तेषां द्वंद्वो बहुत्वः
तत्र बहुवचने प्राप्ते द्विवचनं विधीयते। तिष्यपुनर्वस्वोर्नक्षत्रविशेषयोर्द्वंद्वे बहुवचनप्रसंगे नित्यं द्विवचनं
भवति। उदितौ तिष्यपुनर्वसू दृश्येते। तिष्यपुनर्वस्वोरिति किं। विशाखानुराधाः। नक्षत्र इति किं। तिष्य
श्च माणवकः। पुनर्वसू च माणवकौ। तिष्यपुनर्वसवो माणवकाः। ननु च प्रकृतमेव नक्षत्रग्रहणं किम
र्थं पुनरुच्यते। पर्यायाणामपि यथा स्यात्। तिष्यपुनर्वसू। पुष्यपुनर्वसू। सिध्यपुनर्वसू। द्वंद्व इति किं।
प्राप्तिष्यः पुनर्वसू। येषां ते इमे तिष्यपुनर्वसवः। तिष्यादय एव विपर्ययेण। दृश्यमाना बहुव्रीहि
र्गृह्यते। तेन नक्षत्रे समास एवायं। बहुवचनस्येति किं। एकवचनस्य मा भूत्। तिष्यपुनर्वस्विदमिति
सर्वो द्वंद्वो विभाषा एकवद्भवतीत्यस्यैतदुदाहरणं। नित्यग्रहणं विकल्पनिवृत्त्यर्थं। ६३। सरूपाणा

ले२

का॰अ॰१पा॰२ मेकशेषएकविभक्तौ॥ समानंरूपमेषामिति सरूपाः। सरूपाणांशब्दानांएकविभक्तौपरतएकशे
३७ षोभवति। एकःशिष्यते। इतरेनिवर्त्तंते। वृक्षश्चवृक्षश्चवृक्षौ। वृक्षश्चवृक्षश्चवृक्षश्चवृक्षाः। प्रत्यर्थश
ब्दनिवेशान्नैकेनानेकस्याभिधानं। तत्रानेकार्थाभिधानेनेकशब्दत्वंप्राप्तं। तस्मादेकशेषः सरूपा
णामितिकिं। प्लक्षन्यग्रोधौ। रूपग्रहणंकिं। भिन्नेप्यर्थेयथास्यात्। अक्षाः पादाः माषाः। एकग्रह
णंकिं। द्विबहोःशेषोमाभूत्। शेषग्रहणंकिं। आदेशोमाभूत्। एकविभक्ताविति किं। पयःपयोजरस
इति। ब्राह्मणाभ्यांचकृतं। ब्राह्मणाभ्यांचदेहि॥ वृद्धोयूनातल्लक्षणश्चेदेवविशेषः॥ शेषइति
वर्त्तते। यूनेतिसहयोगेतृतीया। वृद्धशब्दःपूर्वाचार्यस्यसंज्ञागोत्रस्यअपत्यमंतर्हितंवृद्धमिति
वृद्धयूनोःसहवचनेवृद्धःशिष्यतेयुवानिवर्त्तते। तल्लक्षणश्चेदेवविशेषः। तदितिवृद्धयूनोर्निर्देशः
तल्लक्षणशब्दोनिमित्तपर्यायः। चेच्छब्दोयद्यर्थे। एवकारोवधारणे। विशेषोवैरूप्यं। वृद्धयुवनिमित्त २४
कमेववैरूप्यंभवति। ततोवृद्धःशिष्यते। समानायामाकृतौवृद्धयुवप्रत्ययौ। निर्दिष्टेति। गार्ग्यश्चगार्ग्यायणश्च

×गार्ग्यौ वृद्धः किं×।

यणश्चगर्गगार्ग्यायणौ। यूनेतिकिं। गार्ग्यगर्गौ। तल्लक्षणइतिकिं। गार्ग्यवात्स्यायनौ। एवकारः किमर्थः
भागवित्तिश्चभागवित्तिकश्च। भागवित्ती। भागवित्तिकौ। कुत्सासौवीरत्वंच भागवित्तिकस्यापरोविशेषो
विद्यते॥ स्त्रीपुंवच्च॥ शेषइतिवर्त्तते। वृद्धोयूनेतिमर्वं। स्त्रीवृद्धायूनासहवचनेशिष्यते। तल्लक्षणश्चेदे
वविशेषोभवति। पुंसइवास्याःकार्यंभवति। स्त्र्यर्थःपुमर्थवद्भवति। गार्गीचगार्ग्यायणश्चगार्ग्यौ। वात्सी
चवात्स्यायनश्चवात्स्यौ। दाक्षीचदाक्षायणश्चदाक्षी॥ पुमान्स्त्रिया॥ तल्लक्षणश्चेदेवविशेषइति
वर्त्तते। वृद्धोयूनेतिनिवृत्तं। स्त्रियासहवचनेपुमान्शिष्यते। स्त्रीनिवर्त्तते। स्त्रीपुंसलक्षणश्चेदेवविशे
षोभवति। ब्राह्मणश्चब्राह्मणीचब्राह्मणौ। कुक्कुटश्चकुक्कुटीचकुक्कुटौ। तल्लक्षणश्चेदेवविशेष
इत्येव। कुक्कुटश्चमयूरीचकुक्कुटमयूर्यौ। एवकारःकिमर्थः। इंद्रश्चइंद्राणीचइंद्रेंद्राण्यौ। पुंयोगाद्रा
ख्यायामित्यपरोविशेषः। पुमानितिकिं। प्राकृचप्राचीचप्राकृप्राच्यौ। प्रागित्ययमव्ययमलिंगं॥ भ्रा
तृपुत्रौस्वसृदुहितृभ्यां॥ यथासंख्यंभ्रातृपुत्रौशिष्येते। सहवचनेस्वसृदुहितृभ्यां। स्वसाभ्रासहव

३८ वचने भ्रातृशब्दः शिष्यते। भ्राता च स्वसा च भ्रातरौ। दुहित्रा सह वचने पुत्रशब्दः शिष्यते। पुत्रश्च दुहि
ता च पुत्रौ॥६८॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां॥ तल्लक्षणश्चेदेव विशेष इति वर्त्तते। अ
नपुंसकान्नपुंसकमात्रकृते विशेषे नपुंसकेन सह वचने नपुंसकं शिष्यते। एकवच्चास्य कार्यं तच्चा
न्यतरस्यां। शुक्लश्च कंबलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं। तानि इमानि शुक्लानि
अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्लं च शुक्लानि। एकवच्चेति न भवति॥६९॥ पिता मात्रा॥ अन्य ७०
तरस्यामिति वर्त्तते। नैकवदिति। मात्रा सह वचने पितृशब्दः शिष्यते अन्यतरस्यां॥ श्वशुरश्च श्वश्रूश्च श्वशुरः श्वश्र्वा॥
श्वशुरौ। श्वश्रूश्वशुराविति॥७१॥ त्यदादीनि सर्वैर्नित्यं॥ त्यदादीनि शब्दरूपाणि सर्वैः सह वचने नि
त्यं शिष्यंते। त्यदादिभिरन्यैश्च सर्वग्रहणं साकल्यार्थं स च देवदत्तश्च तौ। त्यदादीनां मिथो यत्‌ यत् ३५
परं तत्तच्छिष्यते। स च यश्च यौ। यश्च कश्च कौ॥७२॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥ ग्राम्याणां पशूनां
संघा ग्राम्यपशुसंघाः एतेषु सह विवक्षायां स्त्री शिष्यते। पुमान् स्त्रियेति पुंसः शेषे प्राप्ते स्त्रीशेषो

३९ विधीयते। अतरुणग्रहणं सामर्थ्यात् पशुविशेषणं। गाव इमाः। अजा इमाः। ग्राम्यग्रहणं किं। रुरव इमे
पृषत इमे। पशुष्विति किं। ब्राह्मणाः क्षत्रियाः। संघेष्विति किं। एतौ गावौ चरतः। अतरुणेष्विति किं। वत्सा
इमे। कर्करा इमे। अनेकशफेष्विति वक्तव्यं। इह मा भूत्। अश्वा इमे। गर्दभा इमे॥७३॥ ॥श्री॥ ॥
॥ ॥इति काशिकायां वृत्तौ प्रथमाध्यायस्य द्वितीयः पादः समाप्तः॥ ॥ ॥श्री॥ ॥श्री॥ ॥
लेखकपाठकयोः॥ ॥शुभं भवतु॥ ॥ ॥ ॥ श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥